শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অরণ্যকাণ্ডে

# ॥ সপ্তমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ সপ্তমঃ সর্গঃ ॥

## সীতালক্ষ্মণসহিতস্য শ্রীরামস্য সুতীক্ষ্ণস্যাশ্রমং গৎৱা তেন সহ ৱার্তালাপস্তেন চ সৎকৃতস্য তস্য তত্রৈৱ রাত্রৌ নিৱাসঃ

রামস্তু সহিতো ভ্রাত্রা সীতযা চ পরন্তপঃ।
সুতীক্ষ্ণস্যাশ্রমপদং জগাম সহ তৈর্দ্বিজৈঃ॥ **3.7.1** ॥

স গৎৱা দূরমধ্ৱানং নদীস্তীর্ত্ৱা বহূদকাঃ।
দদর্শ ৱিমলং শৈলং মহামেরুমিৱোন্নতম্॥ **3.7.2** ॥

ততস্তদিক্ষ্ৱাকুৱরৌ সততং ৱিৱিধৈর্দ্রুমৈঃ।
কাননং তৌ ৱিৱিশতুঃ সীতযা সহ রাঘৱৌ॥ **3.7.3** ॥

প্রৱিষ্টস্তু ৱনং ঘোরং বহুপুষ্পফলদ্রুমম্।
দদর্শাশ্রমমেকান্তে চীরমালাপরিষ্কৃতম্॥ **3.7.4** ॥

তত্র তাপসমাসীনং মলপঙ্কজধারিণম্।
রামঃ সুতীক্ষ্ণং ৱিধিৱৎ তপোধনমভাষত॥ **3.7.5** ॥

রামোঽহমস্মি ভগৱন্ ভৱন্তং দ্রষ্টুমাগতঃ।
তন্মাভিৱদ ধর্মজ্ঞ মহর্ষে সত্যৱিক্রম॥ **3.7.6** ॥

স নিরীক্ষ্য ততো ধীরো রামং ধর্মভৃতাং ৱরম্।
সমাশ্লিষ্য চ বাহুভ্যামিদং ৱচনমব্রৱীৎ॥ **3.7.7** ॥

স্বাগতং তে রঘুশ্রেষ্ঠ রাম সত্যভৃতাং ৱর।
আশ্রমোঽযং ৎৱযাঽঽক্রান্তঃ সনাথ ইৱ সাম্প্রতম্॥ **3.7.8** ॥

প্রতীক্ষমাণস্ত্বামেৱ নারোহেঽহং মহাযশঃ।
দেৱলোকমিতো ৱীর দেহং ত্যকত্বা মহীতলে॥ **3.7.9** ॥

চিত্রকূটমুপাদায রাজ্যভ্রষ্টোঽসি মে শ্রুতঃ।
ইহোপযাতঃ কাকুৎস্থ দেৱরাজঃ শতক্রতুঃ॥ **3.7.10** ॥

উপাগম্য চ মে দেৱো মহাদেৱঃ সুরেশ্ৱরঃ।
সর্ৱান্ লোকাঞ্জিতানাহ মম পুণ্যেন কর্মণা॥ **3.7.11** ॥

তেষু দেৱর্ষিজুষ্টেষু জিতেষু তপসা মযা।
মৎপ্রসাদাৎ সভার্যস্ত্বং ৱিহরস্ৱ সলক্ষ্মণঃ॥ **3.7.12** ॥

তমুগ্রতপসং দীপ্তং মহর্ষিং সত্যৱাদিনম্।
প্রত্যুৱাচাত্মৱান্ রামো ব্রহ্মাণমিৱ ৱাসৱঃ॥ **3.7.13** ॥

অহমেৱাহরিষ্যামি স্ৱযং লোকান্ মহামুনে।
আৱাসং ৎৱহমিচ্ছামি প্রদিষ্টমিহ কাননে॥ **3.7.14** ॥

ভৱান্ সর্ৱত্র কুশলঃ সর্ৱভূতহিতে রতঃ।
আখ্যাতং শরভঙ্গেন গৌতমেন মহাত্মনা॥ **3.7.15** ॥

এৱমুক্তস্তু রামেণ মহর্ষির্লোকৱিশ্রুতঃ।
অব্রৱীন্মধুরং ৱাক্যং হর্ষেণ মহতা যুতঃ॥ **3.7.16** ॥

অযমেৱাশ্রমো রাম গুণৱান্ রম্যতামিতি।
ঋষিসঙ্ঘানুচরিতঃ সদা মূলফলৈর্যুতঃ॥ **3.7.17** ॥

ইমমাশ্রমমাগম্য মৃগসঙ্ঘা মহীযসঃ।
অহৎৱা প্রতিগচ্ছন্তি লোভযিৎৱাকুতোভযাঃ॥ **3.7.18** ॥

নান্যো দোষো ভৱেদত্র মৃগেভ্যোঽন্যত্র ৱিদ্ধি ৱৈ।
তচ্ছ্রুৎৱা ৱচনং তস্য মহর্ষের্লক্ষ্মণাগ্রজঃ॥ **3.7.19**॥

উৱাচ ৱচনং ধীরো ৱিগৃহ্য সশরং ধনুঃ।
তানহং সুমহাভাগ মৃগসঙ্ঘান্ সমাগতান্॥ **3.7.20**॥

হন্যাং নিশিতধারেণ শরেণানতপর্ৱণা।
ভৱাংস্তত্রাভিষজ্যেত কিং স্যাৎ কৃচ্ছ্রতরং ততঃ॥ **3.7.21**॥

এতস্মিন্নাশ্রমে ৱাসং চিরং তু ন সমর্থযে।
তমেৱমুক্ত্বাপরমং রামঃ সন্ধ্যামুপাগমৎ॥ **3.7.22**॥

অন্ৱাস্য পশ্চিমাং সন্ধ্যাং তত্র ৱাসমকল্পযৎ।
সুতীক্ষ্নস্যাশ্রমে রম্যে সীতযা লক্ষ্মণেন চ॥ **3.7.23**॥

ততঃ শুভং তাপসযোগ্যমন্নং
 স্ৱযং সুতীক্ষ্নঃ পুরুষর্ষভাভ্যাম্।
তাভ্যাং সুসৎকৃত্য দদৌ মহাত্মা
 সন্ধ্যানিৱৃত্তৌ রজনীং সমীক্ষ্য॥ **3.7.24**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অরণ্যকাণ্ডে সপ্তমঃ সর্গঃ॥